किम्? अहरत्यस्य इषून् गतः। न गतिर्व्यवधीयते। कालेषु इति किम्? योजनमत्यस्य गाः पाययति[1]। अध्वकर्मकमत्यसनं व्यवधायकम्, न [2]कालकर्मकम्॥

## नाम्न्यादिशिग्रहोः। (५८/३३८०)

[3]द्वितीयायाम् इत्येव। नामशब्दे द्वितीयान्ते उपपदे आदिशेर्ग्रहेश्च धातोः णमुल् प्रत्ययो भवति। नामादेशमाचष्टे। नामग्राहम् [4]आचष्टे॥

## अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ। (५९/३३८१)

[5]अव्यये उपपदे अयथाभिप्रेताख्याने गम्यमाने करोतेः[6] क्त्वाणमुलौ[7] भवतः। ब्राह्मण, पुत्रस्ते जातः। किं तर्हि वृषल, [8]नीचैःकृत्याचक्षे, नीचैः कृत्वा, नीचैःकारम्[9]। उच्चैर्नाम प्रियमाख्येयम्। ब्राह्मण, कन्या ते गर्भिणी[10]। किं तर्हि [11]वृषल, [12]उच्चैःकृत्याचक्षे, उच्चैः कृत्वा, उच्चैःकारम्[13]। नीचैर्नामाप्रियमाख्येयम्। अयथाभिप्रेताख्याने इति किम्? उच्चैः कृत्वाचष्टे पुत्रस्ते जातः इति। क्त्वाग्रहणं किम्, यावता सर्वस्मिन्नेवात्र प्रकरणे वासरूपेण क्त्वा[14] भवति इत्युक्तम्? समासार्थं वचनम्। तथा [15]च 'क्त्वा च' (२.२.२२/७८५) इत्यस्मिन् सूत्रे 'तृतीयाप्रभृतीन्यन्यतरस्याम्' (२.२.२१/७८४) इति [16]वर्तते। णमुलधिकारे पुनर्णमुल्ग्रहणं[17] तुल्य[18]कक्षत्वज्ञापनार्थम्, तेनोत्तरत्र द्वयोरप्यनुवृत्ति[19]र्भविष्यति॥

## तिर्यच्यपवर्गे। (६०/३३८२)

तिर्यक्शब्दे उपपदे कृञः क्त्वाणमुलौ प्रत्ययौ भवतः, अपवर्गे गम्यमाने। अपवर्गः समाप्तिः। तिर्यक्कृत्य गतः, [20]तिर्यक्कृत्वा गतः, तिर्यक्कारं गतः। [21]समाप्य गतः इत्यर्थः। अपवर्गे इति किम्? तिर्यक्कृत्वा काष्ठं गतः। तिर्यचि इति [22]शब्दानुकरणम्। न च प्रकृतिवदनुकरणेन भवितव्यम्, अनुक्रियमाणरूपविनाशप्रसङ्गात्, एतदोऽश् (२.४.३३/१९६२), 'अदसो मात्' (१.१.१२/१०१) इति[23]॥

---

1. क्वचित् स्रुघ्नादौ पाययित्वा ततो योजनमतिक्रम्य पाययति इत्यर्थः इत्यधिकम् क, अध्वानमत्यस्य गाः पाययति इत्यधिकम् फ. 2. कालकर्म ह. 3. वाक्यमिदं नास्ति फ. 4. आह्वयति ब. फ, आह्वयते ह. 5. द्वितीयायामित्येव इत्यधिकम् ब. 6. धातोः इत्यधिकम् ब. 7. प्रत्ययौ इत्यधिकम् ब. 8. नीचैः कृत्वा ब. ह. 9. आचक्षे इत्यधिकम् फ. 10. जाता इत्यधिकम् अ. 11. वृषल नास्ति फ. 12. उच्चैः कृत्वा ब. फ. ह. 13. आचक्षे इत्यधिकम् फ. 14. अपि इत्यधिकम् क. फ. 15. हि अ. 16. अनुवर्तते फ, इत्येवानुवर्तते ब. 17. णमुलः इत्यधिकम् फ. 18. °कक्ष्यत्व° ह. 19. भवति ब. 20. उदाहरणमिदं नास्ति फ. 21. परिसमाप्य क. 22. शब्दरूपात् अनुकरणम् फ, शब्दरूपानुकरणम् ब. 23. यथा इत्यधिकम् अ. क. ह.